आत्मस्वरूपप्राप्तौ "आत्मलाभात्परोलाभो नास्तीति मुनयो विदुः" पुरा० "आत्मलाभपरिणामनिरोधैः" किरा०।

**आत्मलोक** पु० आत्मैव लोकः प्रकाशः। स्वप्रकाशे आत्मनि।

**आत्मलोमन्** न० ६त०। सुखजाते लोमभेदे १श्मश्रुणि(दाड़ि) २आत्मलोममात्रे च।

**आत्मवत्** त्रि० आत्मा चित्तं वश्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप्। १वश्यचित्ते। "उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते। आत्मवान् सत्त्ववानुक्त" इत्युत्पलमालोक्तौ २निर्विकारचित्ते च "प्रकृतिष्वात्मजमात्मवत्तया" रघुः "तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः"। "गृहे गुरावरण्ये वा निवसन्नात्मवान् द्विजः" "पूर्वं पूर्वं गुरुतरं विद्यात् व्यसनमात्मवान्" "ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया" इति च मनुः। "न त्वामेवंविधो-भावः स्प्रष्टुमर्हति मानद!। आत्मवन्तमिव व्याधिः पुरुषं वृद्धसेविनम्" भा० व०प० २७९ अ०। आत्मा प्रकाश्य-तया विद्यतेऽस्य। आत्मप्रकाशके ३शास्त्रे "श्रुतमाविष्कृत-मात्मवत् त्वया" रघुः। आत्मना तुल्या क्रिया वति। ४आत्म-तुल्यक्रियायाम् अव्य०। "आत्मवन्मन्यते जगत्" इति नीतिः "मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" इति चाणक्यः।

**आत्मवश** त्रि० आत्मनोवश आयत्ततात। आत्माधीने। "यद्यदात्मवशं तु स्यात्तत्तत् सेवेत यत्नतः" "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" इति च मनुः।

**आत्मवश्य** त्रि० आत्मा मनो वश्योयस्य। वशीभूतमनस्के "आ-त्मवश्योविधेयात्मा प्रसादमधिगच्छति" गीता २आत्मनो-वश्ये च।

**आत्मविक्रय** पु० ६त०। स्वदेहविक्रये। स च "गोबधोऽयाज्य-संयाज्यपारदार्य्यात्मविक्रय" इति मनूक्त उपपातकभेदः।

**आत्मविद्** त्रि० आत्मानं यथार्थरूपेण वेत्ति विद्—क्विप् ६त०। आत्मस्वरूपाभिज्ञे "आत्मविदोजनाः" आत्म शब्दे उदा० "अधीयन्नात्मविद्विद्याम्" भट्टिः "तरति शोकमात्मवित्" श्रुतिः "ध्यानयोगमुपागम्य प्रसन्नमतयः सदा। सुखोप-चयमव्यक्तं प्रविशन्त्यात्मवित्तमाः" भा०आश्व०प०५१अ०। आत्मानं स्वपक्षं वेत्ति क्विप्। २स्वपक्षज्ञातरि "य इहा-त्मविदो विपक्षमध्ये" माघः।

**आत्मविद्या** स्त्री आत्मनोविद्या। आत्मनो यथास्वरूपावेदक-विद्यायाम् "आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः। "आत्मविद्या च पौराणी धर्मशा-स्त्रात्मिका तथा" नन्दिपु० सा च उपनिषद्रूपा तदुप-कारिशारीरकविद्या च। तद्विद्यासाधने २शास्त्रे च।

**आत्मवीर** त्रि० आत्मा प्राणः वीरइव यस्य। १विशिष्टबलयुक्ते २श्यालके ३पुत्रे विदूषके च पु० मेदिनिः।

**आत्मवृत्ति** स्त्री आत्मनोवृत्तिः। १आत्मनोवर्त्तनोपाये। आत्मनि वृत्तिः स्थितिर्यस्य। २स्वस्थे पदार्थे त्रि०।

**आत्मशक्ति** स्त्री६त०। आत्मानुरूपसामर्थ्ये। "दैवं निहत्य कुरु पौरुषमात्मशक्त्या" नीतिः शक्तिश्च कार्य्यजननानुकूलः सामर्थ्यभेदः सा च देहप्राणादिनिष्ठा। आत्मनः परमात्म-नो जगज्जननशक्तौ २मायायाञ्च "देवात्मशक्तिं स्वगुणै-र्निगूढाम्" श्रुतिः। [र्य्यामि राजनि०।

**आत्मशल्या** स्त्री आत्मा स्वरूपं शल्यमिव यस्याः। शताव-

**आत्मशुद्धि** स्त्री आत्मनः देहस्य मनसो वा शुद्धिः। १देह-शुद्धौ २चित्तशुद्धौ च शुद्धिश्च अशुद्धिशब्दे व्याख्याता।

**आत्मश्लाघा** स्त्री ६त०। आत्मनोऽसत्यगुणाविष्करणे गर्वभेदे "आत्मश्लाघा विवर्जितः" महापुरुषलक्षणम्।

**आत्मसंयम** पु० आत्मनो मनसः संयमः। चित्तसंयमने "आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते" गीता।

**आत्मसमुद्भव** पु०आत्मा देहोमनः परमात्मावा समुद्भवोऽस्य। १पुत्रे "हताविहन्मोह नरर्षभेण वयं सुरेशात्मसमुद्भवेन" भा०द्रो०प०११८अ०। २मनोभवे कामे च पु० ३मनो-जन्ये सुखादौ त्रि० ४कन्यायां ५बुद्धौ च स्त्री परमात्मस-म्भूते ६आकाशादौ त्रि०। ७चतुर्मुखे ८शिवे ९विष्णौ १० परमात्मनि च पु०।

**आत्मसम्भव** पु०सम्भवत्यस्मात् सम्+भू—अपादाने अप् आत्मा सम्भवो यस्य। तनूजे १पुत्रे। "एवमात्तरतिरात्मसम्भवान् तान् निवेश्य चतुरोऽपि तत्र सः"। "चकार नाम्ना रघु-रात्मसंभवम्" "तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः" इति च रघुः २मनोजन्ये त्रि० ३कामे सुखादौ पु० ४कन्यायां ५बुद्धौ च स्त्री। ६आकाशादौ ७भूते त्रि०। "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूत आकाशाद्वायुर्वायोरग्नि-रग्नेरापः अद्भ्यः पृथिवीति" श्रुत्युक्तेस्तेषां तथात्वम् आत्मसंभवतादयोऽप्यत्र। आत्मा परमात्मा सम्भवोऽस्य। ७चतुर्मुखे पु० आत्मना सम्भवति अच्। ८शिवे ९विष्णौ १०परमात्मनि च पु०।

**आत्मसाक्षिन्** त्रि० आत्मनः बुद्धिवृत्तेः साक्षी प्रकाशकः। वेदान्तादिमतसिद्धे बुद्धिवृत्तिप्रकाशके चैतन्ये।

**आत्मसात्** अव्य० कार्त्स्न्येनात्मनोऽधीनो भवति सम्पद्यते